IJNRD.ORG ISSN : 2456-4184
INTERNATIONAL JOURNAL OF NOVEL RESEARCH AND DEVELOPMENT (IJNRD) | IJNRD.ORG
An International Open Access, Peer-reviewed, Refereed Journal

वैदिकसंस्कृतौ स्त्रीणां मानवाधिकाराः

(Human rights of Women in Vedic Culture)

Ram Dev
Assistant Professor
Department of Sanskrit, Chaudhary Devi Lal University, Sirsa
State of Haryana)India(

Abstract: *वैदिकसंस्कृतिः विश्वस्य प्रथमा संस्कृतिः वर्तते यत्र यथा मानवाः जीवन्ति तथैव अन्ये प्राणिनोऽपि । प्रकृतिप्रेमिण आसन् अस्माकं पूर्वजाः ऋषयश्च । तेषां काले कस्यचित् कस्याञ्चित् वा अधिकाराणां हननं कथं वा भवितुमर्हति? अद्यत्वे समग्रेऽपि विश्वे मानवाधिकारविषयिणी या चर्चा जायमाना श्रूयते । तस्मिन् काले ते मानवाधिकाराः व्यवहारपथे आसन् इति स्पष्टीकर्तुमिदं शोधपत्रं लिख्यते मया । अस्मिन् शोधपत्रे विशेषतः वैदिकसंस्कृतौ स्त्रीणां के च आसन् अधिकाराः मानवाधिकाराः वा इति स्पष्टरूपेण प्रतिपादनं कृतं वर्तते ।*

*(**Abstract:** Vedic culture is the first culture in the world where other animals live as humans do. Our ancestors and sages were lovers of nature How can anyone or anyone's rights be violated during their time? Today, there is a lot of discussion about human rights that is being heard all over the world. I am writing this paper to clarify that those human rights were in practice at that time. This paper clearly states what rights or human rights women had, especially in Vedic culture.)*

Keyword: Human rights Women's rights, Vedic Culture, The right to fight, Property Rights, Vedic mantras.

न स्त्रीः स्वातन्त्र्यमर्हति[१] इत्येवोपदेशं स्वीकृत्य महर्षेः मनोः तात्पर्यार्थमजानन्तः केचन भारतीयसंस्कृतिः पुरुषपक्षपातीति स्त्रीसमाजस्य विरोधीति मनुः पक्षपातीति वा आक्षिपन्ति । परन्तु तदानीं कीदृशी आसीत् स्त्रीणां स्थितिः? के च आसन् तासामधिकाराः? मनोर्वाक्यस्य कः वास्तविकाभिप्रायः? वैदिककाले के आसन् स्त्रीणामधिकारः स्मृतिकाले च ? एतेषां प्रश्नानामुत्तरैरेव मनोर्वाक्यस्यास्य अर्थ अवगन्तुं शक्य अस्माभिः।

अध्ययनाध्यापनकर्मसु स्त्रीणामधिकारः (Women's rights in study and teaching):

कस्यचिदपि समाजस्य कस्यचिदपि वर्गस्योत्थानहेतवे शिक्षास्वातन्त्र्यशक्तीकरणमेवाऽऽधारत्वेन ग्राह्यं भवति । वैदिककाले स्त्रीणां शिक्षायाः व्यवस्था आसीत् । पुत्रवत् तासामपि उपनयनादिसंस्कारेषु अधिकार आसीत् । वेदाध्ययनेऽपि तासामधिकारोऽङ्गीक्रियते । गृहस्थजीवनसम्बद्धविषयेषु तासां योग्यत्वमभीष्टमासीत् । वैदुष्यमासाद्य ताः यज्ञादिकर्मणि विद्याविवादे मन्त्रदर्शनकर्मण्यपि प्रावर्तन्त । एतस्मादेव कारणात् वैदिककाले स्त्रीणां

शिक्षोपनयनादिषु अधिकारो परिलक्ष्यते - **पुराकाले तु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥** (स्मृतिचन्द्रिकायाम्)

वैदिककाले तु नैकाः ऋषिकाः वैदिकमन्त्राणां साक्षात्कारं कृतवत्यः द्रष्टुं शक्यते। तत्र काश्चन सन्ति - घोषा अपाला विश्ववारा दाक्षायणी श्रद्धा कामायनी लोपामुद्रा रोमशा ब्रह्मवादिनी गोधा सावित्री सूर्या चेत्याद्याः ऋषिकाः समुल्लसन्ति याभिरनेके सूक्तानि मन्त्राः वा दृष्टाः।

स्त्रीणां वरचयनस्याधिकारः (Women's right to choose their husbands):

ब्रह्मचर्यपूर्वकं वेदाध्ययनस्य यो नियमः तमेवाश्रित्य वैदिककाले कन्या युवानं पतिं विन्दते स्म इति ज्ञायतेऽथर्ववेदस्य मन्त्रेण – **ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।**[२] अनेन अनुमातुं शक्यते यद् वेदेषु युवानमेव पतिमधिगन्तुं युवतिरेव विवाहार्हा भवति न बाला। अत एव वेदेषु बालविवाहनिषेधः प्रतिभाति। युवावस्थायां दुर्भाग्येण वैधव्यं प्राप्तवत्याः युवत्याः पुनर्विवाहोऽपि प्रायो देवरेण सह प्रथित आसीत्। कारणं निरुक्ते यास्केन देवरशब्दस्य निर्वचनं द्वितीयवररूपेण कृतं वर्तते। ऋग्वेदे देवरेण सह तासां विवाहप्रसङ्गो द्रष्टुं शक्यते। किन्तु वैधव्याप्तानां स्त्रीणां कृते नासीत् कोऽपि प्रतिबन्धः। तत्रैव ऋग्वेदे-

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि। हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसम्बभूव ॥[३]

विवाहसम्बन्धमधिकृत्य वैदिकवाङ्मये स्त्रीणां कृते न केवलं पतिवरणस्य अधिकार एव आसीदपितु गन्धर्वविवाहेन सार्धमेव अन्तर्जातीयविवाहस्यापि परम्परा आसीत्। राज्ञो रथवीतिनः कन्यया सह ऋषेः श्यावाश्वस्य प्रणयप्रसङ्गोऽथ च पुरुमित्रस्य कन्यया सह ऋषेर्विमदस्य विवाहप्रसङ्गोऽत्र स्मरणीयः **युवं रथेन विमदाय शुन्ध्युध्वं न्यूहथुः पुरुमित्रस्य योषताम् ॥**[४] एवं स्त्रीणामभीष्टवरचयनेऽधिकारः वैदिककालादेव विद्यते। तत्रापि द्वितीयविवाहस्य गन्धर्वविवाहस्य अन्तर्जातीयविवाहस्य च विशेषाधिकाराऽऽसन् इति।

धार्मिककर्मणि अनुष्ठानकर्मणि वा स्त्रीणामधिकारः (Rights of women in religious or ceremonial activities):

वैदिकवाङ्मये द्वावपि स्त्रीपुरुषौ सृष्टिरथस्य चक्रत्वेन उररीकृतौ अतस्तयोः समत्वेकत्वञ्च मन्यते। शतपथब्राह्मणे **यज्ञो वै श्रेष्टतमं कर्म**[५] इत्युक्त्वा यस्य कर्मणो महत्त्वमनेकधा प्रोक्तं तस्मिन् महत्कर्मणि तु स्त्रीं विना पुरुषाणामधिकार एव नाङ्गीकृतः। अत एव **अयज्ञीयो हि योऽपत्नीकः**[६] इत्युक्त्वा स्त्रीणामधिकारः यज्ञादिकर्मणि बहुधा प्रतिपादितः।

युद्धकर्मणि अधिकारः (The right to fight) :

वैदिकवाङ्मयस्य अनुशीलनेनावगम्यते यत् समाजस्य प्रत्येकं कर्मणि स्त्रीणामधिकारोऽसीत्। यतो ऋग्वेदस्यैकस्मिन् मन्त्रे प्रोक्तम् - **स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेना।**[७] विश्पला इन्द्रसेनाऽर्थात् मुद्गलानीत्याद्याः स्त्रिया युद्धकर्मणि सम्पृक्ताः प्रोक्ता वैदिकवाङ्मये। पुरं नगरं दधातीति पुरन्ध्रिरिति निर्वचनेन ज्ञायते यद् स्त्रीणां कृते बहुधा प्रयुक्तः पुरन्ध्रिरिति शब्दोऽपि तस्या रक्षणशक्तिमभिव्यनक्ति ॥

सम्पत्तेरधिकारः (Property Rights) :

मनुस्मृतौ अष्टमाध्याये राजधर्मं कथयन् मनुः स्त्रीधनस्य रक्षणं राज्ञः कर्तव्यम्। पतिधनस्य सङ्ग्रहे व्यये चासीत् स्वातन्त्र्यम् - **अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ॥**[८] स्त्रीधनस्य सम्पत्तेर्वा विषये मनोर्वाक्यम् -

अध्यग्न्यध्यावाह्निकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥[९]

वैदिककाले गृहस्वामिनीपदे नारी (A woman in the position of housewife in Vedic times) :

वैदिकसाहित्यानुशीलनेन विज्ञायते यद् वैदिककाले स्त्रीणां स्थानमतीव गौरवास्पदमासीत्। सा गृहिणी गृहस्वामिनी सहधर्मिणी इत्यादिभिर्विशेषणैः संबोध्यते स्म। पत्नीरूपेण सा गृहस्वामिनीपदम् अलमकरोत्। श्वशुर-श्वश्रवादिषु तस्या अधिकारो मन्यते स्म -

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥[१०]

एतदेव समर्थ्यते यद् गृहिणीहीनं गृहमरण्यसदृशम् । गृहस्य शोभा नार्या वर्धते । धर्मशास्त्रीयग्रन्थेषु यो महिमा वर्णितः तस्य मूले तु गृहिणी एव भवति - **न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते। गृहं तु गृहिणीहीनमरण्यसदृशं मतम् ॥**[११]

समाजस्यार्धांशरूपा नारी (Women as half of society) :

शतपथब्राह्मणे जाया अर्धांशरूपेण अङ्गीकृता वर्तते **"अर्द्धो ह वा एष आत्मनो यज्जाया, तस्माद् यावज्जायां न विन्दते नैव तावत् प्रजायते असर्वो हि तावत् भवति। अथ यथैव जायां विन्दते तर्हि हि सर्वो भवति।** [१२] वस्तुतः स्त्रीपुरुषाणां मिथ एव समाजः । तत्र वैदिककालादेव अस्माकं पूर्वजैः स्त्रीणां समाजेऽर्धांशत्वं स्वीकृत्य तासामधिकाराः सर्वत्र सर्वेषु कार्येषु विधिनियमेषु च सन्तीति प्रतिष्ठापितम् ।

मानवाधिकारः (Human rights) :

स्त्रीणामपहरणे चोरो वधमर्हति (मनु.) इति कथयति मनुः। इति विधिनियमेन ज्ञायते यद् वैदिककालादेव स्त्रीणां विषयेषु समाजः जागरित आसीत् । तासामधिकाराः तासां प्रतिष्ठा च यथा सुरक्षिताः स्युः तादृशी व्यवस्था तदानीन्तने विधाने दृश्यते । " **अतिथिदेवो भव** " इति भारतीयसंस्कृतिः । परन्तु मानवाधिकार आदौ अनन्तरं परम्परा अत्र मनोर्विधानम् -

सुवासिनीः कुमारीश्च रोगिणो गर्भिणी स्त्रियः। अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन् ॥[१३]

अद्यत्वे मानवाधिकारविषयिणी चर्चा सर्वत्र श्रूयते । परञ्च एषा चर्चा वैदिककालादेव जायमाना अवलोक्यतेऽस्माभिः । सर्वेभ्यः भोजनं , सर्वेषां कृते आवासव्यवस्था, स्त्रीपुरुषयोः समानता च इत्येव मानवाधिकाराः वस्तुतः । अत एव स्त्रीणां मानवाधिकारे मनोर्वचनमिदम् -

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः। भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥[१४]

वैदिकमन्त्रेषु स्त्रीणां विषये गर्वोक्तयः (Proud statements about women in Vedic mantras) :

अस्माकं वेदोपनिषदादिशास्त्रेषु स्त्रीस्वाभिमानं द्योतयन्त्यः नैकाः गर्वोक्तयः सन्ति । तत्र परिलक्ष्यते यद् भारतीयसंस्कृतौ कदापि स्त्रीणामनधिकारत्वं नासीत् । ताः सर्वदा पूज्याः आसन् ।

स्त्री सावित्री॥ (जै.उ.ब्रा. ४.२७.१७)

पतयो ह्येव स्त्रियै प्रतिष्ठा॥श.ब्रा. २.६.२.१४)

न वै स्त्रियं घ्नन्ति ॥(शत. ११.४.३.२)

वरुणस्य वा एतत् स्त्री करोति यदन्यस्य सत्यन्येन चरति ॥(शत. २.५.२.२०)

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥(मनु. ३.५६)

यावत् जाया न विन्दते नैव तावत् प्रजायते , असर्वो हि तावद् भवति ॥(शत. ४.२.१.१०)

स्त्रियान्तु रोचमानायां सर्वं तद्रोचते कुलम्।

तस्यां त्वरोचमानायां सर्वमेव न रोचते ॥(मनु. ३.६२)

उपसंहारः (Conclusion:) : इत्थं समग्रशास्त्रालोचनेन वेदादिशास्त्राणाम् अध्ययनेन अवबुध्यते यद् वैदिककालादेव स्त्रीणामधिकाराः सुरक्षितः सन्ति । तत्रापि अध्ययनाध्यापनकर्मसु स्त्रीणामधिकारः वरचयनस्याधिकारः, धार्मिककर्मणि अनुष्ठानकर्मणि वाधिकारः, युद्धकर्मणि अधिकारः, सम्पत्तेरधिकारः , मानवाधिकारः, स्वतन्त्रताया अधिकारदृशा अधिकाराः स्थालीपुलाकन्यायेन अत्र मया विवेचिताः।

(**Conclusion:** Thus, by criticizing the entire scriptures and studying the Vedas and other scriptures, it is understood that women's rights have been protected since the Vedic period. Even there, rights like women's

right to study and teaching, right to choose bridegrooms, right to ritual in religious work, right to war, right to property , human rights, right to freedom etc. have been discussed here by the law of the plate.)

सन्दर्भाः (References) :

१. मनुस्मृतिः ९/३

२. अथर्ववेदे ११/५/१८,ऋक्. १०/८५

३. ऋक् १०/१८/८

४. ऋक् १०/३९/७

५. श.ब्रा. १/७/१/५

६. तै.ब्रा. २/२२/६

७. ऋक्. ५/३०/९

८. मनु. ९/११

९. मनु. ९/११४

१०. ऋक् १०.८५.४६

११. महाभारतम् , शान्तिपर्वणि १४४/६

१२. शतपथब्राह्मणे ५/२/१/१०

१३. मनु. ३/११४

१४. मनुस्मृतिः ३/५१

सन्दर्भग्रन्थाः (Reference Books) :

१. ऋग्वेदीय सूक्तसंग्रह , डा.वेदप्रकाश उपाध्याय अनुराग प्रकाशन , इलाहाबाद ।

२. ऋक्सूक्तसंग्रह, कृष्ण कुमार एवं हरिदत्त शास्त्री , साहित्यभण्डार , मेरठ ।

४. यास्कप्रणीतम् निरुक्तम् , कपिलदेव शास्त्री ,साहित्यभण्डार मेरठ ।

५. मनुस्मृतिः , कुल्लुकभट्टविरचितं टीकासहितम् , हरगोविन्दशास्त्री , चौखम्बा संस्कृतप्रतिष्ठानम् , दिल्ली ।

६. शतपथब्राह्मण , सम्पादक – गंगाप्रसाद उपाध्याय (भाग १ से ३) ।

७. शतपथब्राह्मण (सायणभाष्यसहितम्) , नाग प्रकाशन , दिल्ली

८. शतपथब्राह्मण : एक सांस्कृतिक अध्ययन , उर्मिला देवी शर्मा , मेहरचन्द लछमनदास पब्लिकेशन्स ,नई दिल्ली ।

९. सायणकृत अथर्ववेदभाष्य , सम्पादक – विश्वबन्धु , विश्वेश्वरानन्द वैदिक शोध संस्थानम् , होशियारपुर ।

१०.अथर्ववेद का सुबोधभाष्यः , पं. श्रीपाददामोदरपादसातवलेकरः पारडी ।

११. महाभारत , नीलकण्ठ टीका सहित , Chirtasala Press , Poona ,1929-33